Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १९२
मई - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### प्रेमपुरुषः कृष्णः

एतत् धरातलम् अनेकैः महामानवैः पावनम् अभूत्। तेषु महामानवेषु कृष्णस्य नाम कनिष्ठिकायां प्रतिष्ठां प्राप्नोत्। कारणं किम् ? कृष्णस्य स्नेहः अप्रमेयः आसीत्। अस्माकं हृदयं निःस्नेहं नास्ति। परन्तु तत् केषुचित् परिमितेषु जनेषु एव स्नेहं कर्तुं शक्नोति। तदानीं प्रत्येकं गोपी चिन्तयति स्म यत् कृष्णः मम अस्ति। तेन कारणेन कृष्णः विलक्षणः अस्ति। तस्य स्नेहः समुद्रः इव विशालः गहनः च आसीत्। अद्य इतरैः जनैः एतादृशाः प्रयोगाः क्रियन्ते, परन्तु ते प्रयोगाः नाटकानि भूत्वा स्वल्पेन कालेन विलीयन्ते।

कृष्णः स्नेहसागरः आसीत्। तस्य बहूनि प्रमाणानि अपि वयं प्राप्तुं शक्नुमः। सः सदैव द्रौपद्याः सखा अभवत्। द्रौपदी अपि आपत्काले साहाय्यार्थं पञ्च पतीन् विस्मृत्य कृष्णमेव प्रार्थयते स्म। राधा कृष्णस्य प्रियतमा आसीत्, परन्तु द्रौपदी मित्रम् आसीत्। अद्य युवकाः 'बोयफ्रेण्ड 'गर्लफ्रेण्ड' शब्दयोः यशोगानं कुर्वन्ति। तैः कृष्णात् द्रौपद्याः वा किमपि शिक्षणीयम्। अत्र तदपि विचारणीयं यत् कृष्णस्य जीवने मित्रतायाः माधुर्यं कदापि कटुतां न गतम्। तस्य स्नेहः कदापि कुण्ठितः न अभवत्। यः कृष्णः द्रौपद्यां स्निग्धवान् सः एव कृष्णः कुब्जायाम् (त्रिवक्रायाम्) अपि स्निग्धवान्।

मैत्रीं वयमपि कुर्मः। अस्माकं मैत्री अपि पवित्रा भवेत्। 'अनेन मया वृथा सङ्गः कृतः' इति मित्रस्य विषादः कदापि न भवेत्। गुणवती मैत्री अपि दर्पणः इव नित्यं स्वच्छताम् अपेक्षते। व्यतीतेषु दिवसेषु सुपरिनिष्ठिता मैत्री दीक्षां प्राप्नोति। तादृशी दिव्या मैत्री खलु मरणम् अपि यशःपूर्णं करोति।

कृष्णः प्रेमपुरुषः अस्ति। तस्य शरीरं वयं द्रष्टुं न शक्नुमः, तथापि प्रेमतत्त्वम् अनुभवितुं शक्नुमः अद्यापि। मीरा तस्य उदाहरणाय अलम्। कृष्ण-मीरयोः मध्ये कालस्य महत् अन्तरं विद्यते। परन्तु प्रेमतत्त्वेन मीरा कृष्णात् दूरे नैव आसीत्। तत्त्ववेदिनः ब्रह्मसायुज्यं प्रति बहु चिन्तितवन्तः। मीरा तत् व्यवहारपथे दर्शितवती। सा यत् कृतवती तत् वयमपि कर्तुं शक्नुमः। यतो हि भक्तानां तु प्रेमपुरुषः कृष्णः सदा सुलभः एव। कस्मिंश्चित् नाटके नान्दी एवं क्रियते –

**यस्य स्पर्शनमात्रेण त्रिवक्रा चारुतां गता।**
**पातु स वो जगन्नाथः साधूनां सुलभः सदा ॥**

# सुवर्णाण्डदात्री कुक्कुटी

पण्डरपुरनामके ग्रामे धनेशः नाम कश्चन कृषिकः आसीत्। तस्य गोपालः गोविन्दश्चेति उभौ पुत्रौ आस्ताम्। तयोः विवाहः निर्वर्तितः धनेशेन। तदीयं गृहं विशालम् आसीत्। अतः पुत्रस्नुषादयः सर्वे तत्रैव निवसन्ति स्म।

धनेशस्य अल्पा कृषिभूमिः आसीत्। यदा सः वृद्धः जातः तदा समग्रं गृहव्यवहारं पुत्रयोः अधीनं कृतवान्। गोपालः उषसि एव उत्थाय कृषिभूमौ कार्यं करोति स्म। किन्तु गोविन्दः स्वप्नासक्तः। अतः सः विलम्बेन उत्तिष्ठति स्म।

गोविन्दस्य पत्नी पत्युः एतं स्वभावं न इच्छति स्म। सा पतिं वदति स्म – ''किमेतत् सर्वदा दिवास्वप्ने निरतता नाम ? क्षेत्रं गत्वा अग्रजस्य साहाय्यं यदि क्रियेत तर्हि वरम् अभविष्यत् खलु ?'' इति।

तस्याः वचनस्य परिणामः गोविन्दे कोऽपि न जातः। सः निस्सङ्कोचं वदति स्म – ''किमर्थं चिन्ता भवत्याः ? अग्रे कदाचित् सुवर्णाण्डदात्री कादम्बा मया प्राप्येत। तदा परिश्रमेण विना अहं लक्षाधीशः भवेयम्'' इति।

गोपालस्य तत्पत्न्याः च स्वभावः उत्तमः आसीत्। अतः तौ गोविन्दस्य वचनं महत्त्वपूर्णं न भावयतः स्म। तस्य तादृशात् वचनात् तयोः कापि हानिः अपि न आसीत्।

एवमेव दिनानि गतानि। अथ कदाचित् कश्चन पुरुषः सायङ्काले गोविन्दस्य गृहम् आगतवान्।

मञ्चे शयानः गोविन्दः उत्थाय तं पृष्टवान् – ''कः भवान् ? कः द्रष्टव्यः भवता ?'' इति।

''मम नाम हरिः इति। विशेषकार्यस्य निमित्तं पार्श्वग्रामं गच्छन् अस्मि। रात्रिः आसन्ना अस्ति। अतः अद्य तस्य ग्रामस्य प्राप्तिः कष्टकरी एव। रात्रौ अत्र वासाय यदि भवान् अनुमतिं दद्यात् तर्हि अहम् उपकृतः भवेयम्। प्रातः अहम् इतः निर्गमिष्यामि'' इति अवदत् हरिः। ''अस्तु। अत्रैव मञ्चं स्थापयिष्यामि। भुक्त्वा सुखेन शयनं करोतु नाम'' इति उक्त्वा गोविन्दः हरेः कृते मञ्चादिव्यवस्थां कृतवान्।

भोजनानन्तरं गोविन्देन लक्षितं यत् हरेः समीपे सुवर्णवर्णेन शोभमाना काचित् कुक्कुटी अपि अस्ति इति।

अतः सः तम् अपृच्छत् – ''किम् एतत् ? एषा कुक्कुटी सुवर्णवर्णेन विराजते खलु !''

तदा हरिः अवदत् – ''वस्तुतः एषा कुक्कुटी सुवर्णमयी एव। सुवर्णाण्डं प्रसूते एषा'' इति।

''किम् उक्तं भवता ? किं कुक्कुटी सुवर्णाण्डं प्रसवितुम् अर्हति कदापि ?'' इति आश्चर्येण अपृच्छत् गोविन्दः। तदा हरिः स्वस्य स्यूततः एकं शोभमानम् अण्डं निष्कास्य दर्शयन् अवदत् – ''पश्यतु, एतया कुक्कुट्या प्रसूतम् अण्डम् एतत्। मासे एकवारम् एतादृशम् उण्डं प्रसूते एषा'' इति। ''किम् एषा कुक्कुटी भवतः एव ? एतां कुत्र नेष्यति भवान् ?'' इति कुतूहलेन पृष्टवान् गोविन्दः। ''कश्चन मान्त्रिकः मह्यम् एतां कुक्कुटीं दत्तवान्। एतां भोजयितुं मम सामर्थ्यं नास्ति। अतः पार्श्वग्रामे निवसते बान्धवाय विक्रेतुम् एतां नयन् अस्मि'' इति दुःखमिश्रितेन स्वरेण उक्तवान् हरिः। तस्य वचनात् तदीया असहायकस्थितिः स्पष्टतया ज्ञायते स्म। गोविन्दः पुनरपि कुतूहलेन पृष्टवान् – ''किम् एतां भोजयितुं भवतः सामर्थ्यं नास्ति ? किम् एषा रत्नं वज्रं वा खादति ?'' इति।

''तथा तु नास्ति। तथापि एतस्य स्वभावः विलक्षणः। सामान्यः आहारः दत्तः चेत् सामान्यम् अण्डं दीयते अनया। स्वामिना वर्धितं सद्योनिष्पन्नं धान्यं दत्तं चेत् मासे एकवारं सुवर्णाण्डं दास्यति। अहं तु निर्धनः। मम तु अल्पा अपि कृषिभूमिः नास्ति। अहं किं करवाणि ?'' इति अवदत् हरिः।

'कथमपि एषा कुक्कुटी मया प्राप्तव्या एव' इति विचिन्त्य गोविन्दः हरेः हस्तौ गृहीत्वा अवदत् – "मित्र ! मम भ्रातुः एकरचतुष्टयमिता भूमिः अस्ति । तत्र एकरद्वयमिता भूमिः मत्सम्बद्धा । तत्र अहं धान्यं वर्धयित्वा एतां कुक्कुटीम् आतृप्ति भोजयितुं शक्नोमि । अतः एतां मह्यं ददातु" इति ।

हरिः क्षणकालं विचिन्त्य अवदत् – "अस्तु, भवतः प्रार्थनां व्यर्थीकर्तुं न इच्छामि अहम् । अतः एतां ददामि भवते । एतस्याः मूल्यम् अद्यैव दातव्यं नास्ति भवता । परिश्रमेण कृषिः क्रियते खलु भवता । तदा यत् धान्यं प्राप्यते तत्र अर्धभागपरिमितं धान्यं मह्यं ददातु । षण्मासानन्तरम् अहं पुनः आगत्य तत् धान्यं नेष्यामि" इति ।

गोविन्दः महता सन्तोषेण – "नितराम् उपकृतोऽस्मि मित्र । भवता उक्तं तु अवश्यं दास्यामि" इति उक्त्वा सः कुक्कुटीं हरेः हस्ततः स्वीकृतवान् । तस्मिन् एव दिने सह अग्रजं गोविन्दं दृष्ट्वा स्वकीयं भागं प्रार्थितवान् । "अहं स्वयं कृषिं करिष्यामि । भवतः साहाय्यं मास्तु मम" इति अवदत् सः । एतत् श्रुत्वा आश्चर्यचकितः अपि गोपालः विना प्रतिवचनं गोविन्दाय तदीयं भागं दत्तवान् ।

अनन्तरदिनतः गोविन्दः उषसि उत्थानम् आरब्धवान् । सः कृषिक्षेत्रे परिश्रमेण कार्यं करोति स्म । धान्यं कदा प्राप्यते इति प्रतीक्षते स्म सः । केचन मासाः अतीताः । कृषिक्षेत्रे धान्यानि सिद्धानि जातानि । एतत् दृष्ट्वा गोविन्दः नितरां सन्तुष्टः । अन्यसाहाय्यं विना एव एषा सिद्धिः प्राप्ता तेन इत्यतः ग्रामीणाः सर्वे तस्य प्रशंसां कृतवन्तः ।

गोविन्दः प्रीत्या कुक्कुट्यै आत्मना वर्धितानि धान्यानि ददाति स्म । कुक्कुटी च महता आनन्देन तानि खादति स्म । ततः एकः मासः अतीतः । गोविन्दः अचिन्तयत् – 'एतस्मिन् मासे कुक्कुटी सुवर्णाण्डम् एव प्रसूते' इति । किन्तु तथा तु न जातम् । सा सामान्यम् अण्डम् एव प्रसूते स्म । गोविन्दः तस्मै अधिकानि धान्यानि दत्तवान् । तथापि सा तु सामान्यम् अण्डम् एव ददाति स्म । सामान्यानि अण्डानि एव सुवर्णवर्णं प्राप्नुयुः इति सः अचिन्तयत् । तथा तु न जातम् । तानि भञ्जयित्वा सः परीक्षितवान् । अण्डानाम् अन्तः सुवर्णांशः तु न आसीत् । एतस्मात् सः नितरां खिन्नः । हरेः विषये तस्य क्रोधः आगतः । 'सः मां वञ्चितवान् । अतः योग्येन क्रमेण दण्डयिष्यामि तम्' इति अचिन्तयत् सः ।

तेषु एव दिनेषु हरिः तस्य गृहम् आगतः । सः प्रीत्या अपृच्छत् – "मित्र ! सर्वं कुशलं खलु ?" इति ।

तदा गोविन्दः क्रोधमिश्रितेन स्वरेण अवदत् – "किं कुशलप्रश्नेन ? महावञ्चकः भवान् । भवतः कुक्कुटी सुवर्णाण्डदात्री तु सर्वथा न" इति । तदा हरिः हसन् गोविन्दस्य स्कन्धे हस्तं संस्थाप्य अवदत् – "मित्र ! मया भवान् न वञ्चितः । एषा कुक्कुटी न मम, अपि तु भवतः । तया सुवर्णाण्डं न दत्तं स्यात् नाम, किन्तु सुवर्णाण्डसदृशी फलसमृद्धिः तु दत्ता एव ! तस्याः कारणतः एव भवान् आलस्यं परित्यज्य क्षेत्रे परिश्रमेण कृषिं कृतवान् । तस्मात् भवतः गृहं धान्यराशिना पूर्णम् अस्ति । एषः धान्यराशिः सुवर्णतुल्यः एव खलु ?" इति ।

गोविन्दः क्षणकालं मौनेन स्थितवान् आसीत् । ततः सः अवदत् – "आं हरिवर्य ! भवता युक्तम् उक्तम् । मम गृहे सुवर्णाण्डं न स्यात् नाम, सुवर्णसदृशः धान्यराशिः तु अस्ति । मम दिवास्वप्नशीलतां निवारितवान् भवान् । मम एकः प्रश्नः – भवान् अस्माकं दूरबन्धुः तु न खलु" इति । "न । भवतः बन्धुः न । पार्श्वग्रामे अहम् अध्यापकः अस्मि । इतः ये छात्राः ग्रामीणाः वा तत्र आगच्छन्ति तेषां मुखतः मया भवतः प्रवृत्तिविषयः श्रुतः । यः सुवर्णाण्डदात्र्याः कारण्डायाः विषये स्वप्नं पश्यति तस्मै तादृश्याः एव कुक्कुट्याः दानेन न कापि हानिः इति मया चिन्तितम् । अतः कुक्कुटी एव दत्ता । अपेक्षितं फलं तु सिद्धम् एव" इति हसन् अवदत् हरिः ।

# सर्वमपि कर्माधीनम्

व्योम शाहः

पुरा भारतस्य भुवि सोमकुण्डमिति नामधेयं समृद्धं नगरम् आसीत्। तत्र सोमारिनामा नृपः शासनं करोति स्म। शासकेषु वरः सः उत्तमः पालकः अपि आसीत्। ईश्वरे सः महतीं श्रद्धां दधाति स्म। प्रजासु अपि तस्य प्रीतिः अपूर्वा आसीत्। विविधेषु क्षेत्रेषु प्रजानां महान्तं सहयोगं सम्प्राप्य सः स्वस्य राष्ट्रस्य समृद्धिम् अवर्धयत्।

तस्मिन्नेव नगरे प्राणेशः इत्याख्यः श्रेष्ठी निवसति स्म। सः नृपस्य परमसुहृद् आसीत्। स्वभावेन सः परोपकारी मित्रवत्सलः च आसीत्। तस्य श्रेष्ठिनः विजया इति नामधेया गुणवती शीलयुता कलत्रोत्तमा आसीत्। उभावपि सुखेन जीवनं यापयतः स्म। दैववशात् कुकर्मयोगाद् वा तयोः सन्ततिः न आसीत्। तस्यैव याचनार्थं ताभ्यां कुलदेव्याः महती आराधना कृता। कालक्रमेण देवी सन्तुष्टा। विजयायाः प्राणेशस्य च स्वप्ने सा सहसा प्रादुरभवत्। सा उक्तवती – "याचस्व पुत्र! किमु वरं ग्रहीतुकामोऽसि।"

"मातः! भवत्याः दर्शनेन अस्माकं मानुष्यं सफलीभूतम्। ईश्वरस्य प्रसादेन स्वास्थ्यं वर्तते, प्रभूतं धनम् अस्ति, उत्तमाः सुहृदः बान्धवाश्च सन्ति। इयं च शीलवती मामकी भार्या वर्तते। सर्वस्मिन्नपि लब्धप्राये सन्तत्याः अलाभः बाधते नौ मानसम्। भवत्प्रसादाद् आवां सन्ततिमन्तौ भवेव इत्येव कामये।" इति श्रेष्ठी उक्तवान्।

"तथाऽस्तु।" इत्युक्त्वा सा देवी अदृश्यीभूता। कालक्रमेण देव्याः प्रसादात् तयोः एकः पुत्रः अभवत्। श्रेष्ठिनः मित्रं राजा इमां वार्तां श्रुत्वा उत्साहेन नर्तितुमुद्युक्तोऽभवत्। मन्त्रिणः आज्ञापय्य बहुभिः क्रीडनकैः परिवारितः राजा मित्रस्य गृहम् अगच्छत्। तत्र महान् उत्सवः अयोजितोऽभवत्। शुभे लग्ने पुरोहितेन निर्दिष्टे शुभे मुहूर्ते तस्य तनुजस्य 'देवदत्तः' इति अभिधानं कृतम्। पितरौ तं संस्कारैः अभिसिञ्चतः स्म। शरीरेण क्रमशः वर्धमानः सः परां वृद्धिं प्राप। किन्तु पञ्चमी बालोऽपि सन् सः न किमपि वदति स्म। पितरौ चिन्तार्तौ अभूताम्।

अस्य विषये श्रेष्ठी बहून् अपि वैद्यान् पर्यपृच्छत् किन्तु कुतश्चिद् अपि सन्तोषदम् औषधं न सम्प्राप्तम्। नृपोऽपि स्वीयैः अन्यदेशस्थैः राजमित्रैः सह चर्चां कृत्वा समाधानं प्राप्तुं प्रयत्नं कृतवान्। ततोऽपि किञ्चन परिणामिकं समाधानं न आप्नोत् सः। विवशस्य श्रेष्ठिनः मनसि विचारः प्रकटितः – "अयं मे पुत्रः मूकः एव स्यात्। जगत्यस्मिन् सर्वमपि कर्माधीनमेव विवर्तते। अतः पुरा तेन कृतस्य कस्यचित् कर्मणः एव प्रभावाद् एषः अस्यां स्थितौ वर्तते।"

इतश्च विजया कुलदेव्याम् अत्यन्तं श्रद्धाना आसीत्। सा पुनरपि तस्याः उपासनं प्रारभत। मित्रदुःखेन दुःखितः राजाऽपि स्वस्य अधिष्ठितस्य देवस्य आराधनां प्रासादे प्रारब्धवान्। उपासन–फलस्वरूपेण उभयत्रापि रात्रौ कुलदेवी देवश्च प्रकटितौ। देव्या प्रोक्तम् –

"जानेऽहं विजये! यद्भवती भवदीयपुत्रस्य विषये चिन्तातुरा अस्ति। किन्तु जगत्यस्मिन् सर्वमपि कर्माधीनमेव विराजते। उक्तं च – "**यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्।**

**तथा पूर्वकृतं कर्म कर्त्तारमनुगच्छति॥**"

तस्यैव पूर्वकृतानां पापकृत्यानामिह सः फलमश्नुते। तस्य साहाय्यं कर्तुमुत्काः अपि वयं निःसहायाः। इतोऽपि पञ्चवर्षाणि यावत् सः मूकः एव जीविष्यति।" इत्युक्त्वा सा अदृश्यीभूता।

नृपः अपि तम् एव प्रश्नं देवं पृष्टवान्। सः अपृच्छत् –

“देव ! भवतां दर्शनेन सुखीभवामि । मदीया काचिदपि ईहा नास्ति । मम परममित्रस्य प्राणेशस्य तनुजः देवदत्तः जन्मतो मूकोऽस्ति। तस्यैव कृते श्रेयस्करं याचे।”

“राजन् ! जगतीह सर्वमपि कर्माधीनं विवर्धते, विनश्यति, विवर्तते च । अवतीर्णोऽपि सन् ईश्वरः अस्मात् कर्मजालान्न मुक्तः । पूर्वस्मिन् जन्मनि सः क्रुद्धः सन् देवनिन्दां चकार । तस्यैव परिणामं सः इह लभते । अतः एषः विषयः अशोच्यः । मद्दर्शनं क्वचिदपि अनुपहृतं न जायते । अतः भवत्साधनाप्रभावात् अहम् एनं देवदत्तं शाब्दिकत्वं छान्दसत्वं चार्पयामि।” “धन्योऽस्मि देव!” एवं सोमारौ वचति देवः अदृश्य्यभवत्।

प्रगे विजया स्वपत्ये सर्वमपि वृत्तान्तं न्यवेदयत् । नृपोऽपि तदानीमेव आगात् । सः स्वस्यानुभवम् अकथयत्। श्रेष्ठिनः मुखे मिश्रितः रसः भ्राजते स्म। वृत्तान्तं श्रावयित्वा ततः निरगात् नृपः। माता विजया पुत्रे देवं प्रति अतुलां श्रद्धां विकासितवती।

कालः व्यतीतः । देवदत्तः दशमी बालोऽभवत् । उत्तमैः स्निग्धैः संस्कारैः सन्ततम् अभिषिक्तः सः पित्रोः अवक्त्वा स्वरचितं स्फोटं स्तोत्रम् प्राकाशत्। पित्रोः चरणयुगलं प्रणमन् सः निश्चयं कृतवान् यत् क्वचिदपि हेलायामपि सः गुणाकरस्य ईश्वरस्य निन्दां न करिष्यति।

## मासवार्ता

### सम्पन्नः छन्दःपरिचयवर्गः




संस्कृतच्छन्दसाम् अध्ययनं कर्तुम् इच्छुकानां संस्कृत-अध्येतॄणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थाने ‘छन्दःपरिचयः’ इति अभ्यासक्रमस्य आयोजनं कृतम् । अभ्यासक्रमोऽयं मार्चमासस्य १६ दिनाङ्कात् आरभ्य एप्रिलमासस्य १८ दिनाङ्कं यावत् सप्ताहे दिनद्वयं प्राचलत् । अभ्यासक्रमेऽस्मिन् ११ छात्राः छन्दसाम् अध्ययनम् अकुर्वन्। श्रीश्यामः पटेलः छात्रेभ्यः मार्गदर्शनम् अददात्।

### आरब्धः संस्कृतभाषाशिक्षणवर्गः

अहमदाबादनगरे अमदावाद-मेनेजमेन्ट-एसोसिएशन इति संस्थाने एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य सहयोगेन संस्कृतभाषाशिक्षणवर्गस्य आरम्भः अभवत् । वर्गोऽयं एप्रिलमासस्य २० दिनाङ्कतः ३० दिनाङ्कं यावत् प्राचलत्। एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य निदेशकः डॉ. मिहिरः उपाध्यायः वर्गेऽस्मिन् मार्गदर्शनं प्रायच्छत्।

## कृपया हसन्तु

पू. वन्दनरुचिः विजयः मा. सा.

रमणः - (पितरम् उद्दिश्य) भोः पितः ! अद्य शिक्षकः माम् अताडयत् ।

पिता - किं त्वं क्रीडन् आसीः ?

रमणः - न... न... । अहं तु किमपि नाकरवम् । केवलम् अहं सुप्तवान् आसम् ।

★ ★ ★ ★ ★

नमनः - (रमणम् उद्दिश्य) भोः रमण ! आनन्दस्य किं स्वरूपम् ?

रमणः - मया कथं ज्ञायेत ? मम विवाहस्तु लघुवयसि एव जातः आसीत् ।

★ ★ ★ ★ ★

रमणः - (नमनम् उद्दिश्य) भोः नमन ! वदतु, अस्यां पाठशालायां सर्वश्रेष्ठः विद्वान् कः ?

नमनः - स्वप्रशंसाकरणं मम स्वभावो नास्ति ।

रमणः - तर्हि वदतु अतिमूर्खः कः वर्तते ?

नमनः - कस्यापि निन्दा महानर्थकारिणी ।

★ ★ ★ ★ ★

शिक्षकः - (छात्रान् उद्दिश्य) भोः छात्राः! १९४७ तमे वर्षे देशेन स्वातन्त्र्यं प्राप्तं, ततः १९५० तमे वर्षे किमभवत् ?

मगनः - भो आचार्य ! १९५० तमे वर्षे स्वातन्त्र्यस्य त्रीणि वर्षाणि जातानि आसन् ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**किं कुलेन विशालेन शीलमेवात्र कारणम् ।**
**कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥**

**तात्पर्यम्** – मनुष्येन उत्तमकुले जन्म प्राप्तं चेदपि तस्य श्रेष्ठत्वस्य कारणं शीलमेव भवति न तु कुलं, यथा सुगन्धभरितेषु पुष्पेषु कृमिकीटाः अपि जायन्ते ननु।

**किं नु मे स्वादिदं कृत्वा किं नु मे स्वादकुर्वतः ।**
**इति कर्माणि सञ्चिन्त्य कुर्याद्वा पुरुषो न वा ।**

**तात्पर्यम्** – कार्यकरणतः पूर्वम् इदं क्रियेत चेत् किं भवेत् ? न क्रियेत चेत् किं भवेत् इति सम्यक् विचिन्त्य एव कार्यं करणीयम् अथवा त्यक्तव्यम्।

**कृतं पुरुषशब्देन जातिमात्रावलम्बिना ।**
**योऽङ्गीकृतगुणैः श्लाघ्यः स विस्मयमुदाहृतः ॥**

**तात्पर्यम्** – यद्यपि पुरुषशब्दः केवलं जातिवाचकः । सर्वेषु प्राणिषु सामान्यतः प्रयुज्यते । किन्तु यः सर्वैः गुणानुरागिभिः श्लाघ्यः स एव पुरुषशब्देन उदाहृतः ।

## ज्ञानसरिता

**श्यामः पटेलः**

**भारतीयनक्रः** – "**घडियाल**" – नक्रः ग्राहः वा जले स्थले च वसयमानेषु प्राणिषु शक्तिसम्पन्नः हिंसकश्च । विश्वे नदीषु जलाशयेषु च नक्राः दृश्यन्ते । किन्तु एतेऽपि त्रिधा – "क्रोकोडाइल", "एलीगेटर", "घडियाल" चेति । आहत्य २३ प्रजातयः सन्ति । एते त्रयः परस्परं भिन्नाः वर्तन्ते । कारणमस्ति एतेषां आकृतिः जीवनशैली च भिन्ना । एतेषु "घडियाल" नामधेया नक्रप्रजातिः केवलं भारतीयोपमहाद्वीपे प्राप्यते । गङ्गाप्रभृतिनदीषु दृश्यमानाः एते नक्राः एतेषां दीर्घ–सङ्कुचित–मुखाकृतिकारणात् प्रसिद्धाः सन्ति । एतेषां नासिकायाः उपरि मदग्रन्थिः भवति । अतः "घडियाल" नाम्ना कीर्तिताः प्रादेशिकभाषासु । घडियालनक्राः लवणविहीनजले निवसन्ति । एते मत्स्यभोजिनः भवन्ति । एतेषां शरीरं २० फीटपरिमितं दीर्घं तथा च ४०० तः ६०० किलोग्रामपरिमितं यावत् भारयुक्तं भवति । रङ्गरूपत्वात् एते सामान्यनक्राः इव दृश्यन्ते । यथा अन्ये नक्राः स्वशरीरम् उन्नीय चलितुं शक्नुवन्ति तथा एते न कर्तुं पारयन्ति । एते उरगाः भवन्ति । अर्थात् शरीरस्य उरभागः भूम्या सह घर्षणशीलः भवति । अधिकाधिकम् एते जले एव वसन्ति । किन्तु तदापि स्वकीयस्य दीर्घमुखस्य उपरि भागं जलात् बहिः निष्कास्य विहरन्ति । एतेषां मुखे तीक्ष्णदन्तानाम् आवलिः अवलोकनीया भवति ।



नक्रः – a crocodile,
मदग्रन्थिः – tumour,
लवणविहीन – non-salted

## शब्दमञ्जूषा

| | |
|---|---|
| भीरुः | timid |
| कूर्मः | tortoise |
| वणिक् | trader |
| निगडः | trammel |
| प्रशान्तकः | tranquilliser |
| शान्तिः | tranquillity |
| रूपान्तरणम् | transformation |
| कष्टम् | trouble |
| ऋतम् | truth |
| टङ्कनयन्त्रम् | typewriter |
| करलिपिमुद्रकः | typist |
| अगाधः | unfathomable |
| निर्मूलम् | unfounded |
| अरक्षितः | unguarded |
| अविरतम् | uninterrypted |

## किं भवन्तः जानन्ति ?

**१ ) ब्रह्मणः कति मानसपुत्राः आसन् ?**
(क) अष्ट (ख) दश (ग) द्वादश (घ) चतुर्दश

**२ ) महाभारतयुद्धं कति दिनानि प्राचलत् ?**
(क) पञ्चदश (ख) सप्तदश (ग) अष्टादश (घ) विंशतिम्

**३ ) कति पुरुषार्थाः उक्ताः सन्ति ?**
(क) पञ्च (ख) दश (ग) चत्वारः (घ) द्वौ

**४ ) महाभारतयुद्धे आहत्य कति अक्षौहिणीसेनाः युद्धम् अकुर्वन् ?**
(क) पञ्चदश (ख) अष्टादश (ग) विंशतिः (घ) एकविंशतिः

**५ ) महाभारतयुद्धे पाण्डवानां पक्षे कति अक्षौहिणीसेनाः आसन् ?**
(क) षट् (ख) सप्त (ग) अष्ट (घ) नव

**६ ) महाभारतयुद्धे कौरवाणां पक्षे कति अक्षौहिणीसेनाः आसन् ?**
(क) एकादश (ख) द्वादश (ग) त्रयोदश (घ) चतुर्दश

**७ ) समुद्रमथनेन कति रत्नानि प्राप्तानि आसन् ?**
(क) चतुर्दश (ख) पञ्चदश (ग) षोडश (घ) सप्तदश

उत्तराणि – (१) क (२) ग (३) ग (४) ख (५) ख (६) क (७) क

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Sanskrit Summer Camp

Date: 16/05/2022 to 26/05/2022

**Learn Sanskrit** *Live Sessions*

Offline

Class 9 &10 **व्याकरणम्** with feedback sessions

8.00am to 9.30am, ₹ 3500/-

Online/Offline

**बालसंस्कृतवर्गः**

Value Education through Sanskrit

Class 1 to 4 & 5 to 8

10.00am to 11.30am, ₹ 2000/-

Online

**श्रीमद्भगवद्गीता Chanting**

अध्याय ३ - ४ ( Class 9 & above)

7.30am to 9.00am, ₹ 2000/-

Online

**श्रीमद्भगवद्गीता Chanting**

अध्याय १२ - १५ ( Class 5 to 8)

4.00pm to 5.30pm 16/05/2022 - 20/05/2022, ₹ 500/-

**Contact: Dr Mihir Upadhyay - 98246 16237**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

પ્રસ્તુત કરે છે... Online

## વાર્તા રે... વાર્તા...

ચાલો !

વાર્તાનાં માધ્યમથી બાળકોને આપણી સંસ્કૃતિનો પરિચય કરાવીએ. બાળકોમાં જીવનમૂલ્યો વિકસાવીએ અને એમને સારા શ્રોતા બનાવીએ.

તારીખઃ 16-05-2022થી 20-05-2022

સમયઃ રાત્રે 8-00 થી 9-00

નોંધઃ

ધોરણ ૫ થી ૮ના વિદ્યાર્થીઓ આ કાર્યક્રમમાં ભાગ લઈ શકશે.
આ કાર્યક્રમ online રહેશે. જેનું રજીસ્ટ્રેશન શુલ્ક ₹ 250 છે.
કાર્યક્રમના અંતે વિદ્યાર્થીઓને E-Certificate એનાયત કરવામાં આવશે.
વાર્તાકથનનું માધ્યમ ગુજરાતી રહેશે.

વધુ માહિતી અને રજીસ્ટ્રેશન માટે સંપર્ક કરોઃ
શ્યામ પટેલઃ 82384 11655

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | - 100 |
| द्वैवार्षिकं | रू | - 175 |
| त्रैवार्षिकं | रू | - 250 |
| अङ्कमूल्यं | रू | - 10 |

Online

**Admission Open**

## संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 1/6/22 to 31/9/22
**Day :** Mon-Wed-Fri
**Time :** 7:30am to 9:00am
**Fees :** 5000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006